कोविदः

अभ्यासः – वर्गः ३८

रघुवंशम् २.५९, २.६०

समीचीनम् उत्तरं चिनुत –

१) "तथेति" गां कः उक्तवान् ?

(अ) दिलीपः

(आ) सिंहः

(इ) शिवः

(ई) वसिष्ठः

२) "न्यस्तशस्त्रः" – विग्रहः कः ?

(अ) न्यस्तं शस्त्रं येन सः

(आ) शस्त्रेण न्यस्तः

(इ) न्यस्तस्य शस्त्रः

(ई) न्यस्तञ्च तत् शस्त्रं च

३) अस्मिन् श्लोके गोशब्दः कस्मिन् अर्थे प्रयुक्तः ?

(अ) धेनुः

(आ) भूमिः

(इ) किरणः

(ई) वाणी

४) एषु कः हरिशब्दस्य पर्यायः न ?

(अ) सिंहः

(आ) मण्डूकः

(इ) गरुडः

(ई) वानरः

५) प्रयोगं परिवर्तयत – दिलीपः हरये स्वदेहम् उपानयत् ?

(अ) दिलीपेन हरिः स्वदेहम् उपानीयत

(आ) दिलीपेन हरये स्वदेहः उपानीयत

(इ) दिलीपेन हरये स्वदेहम् उपानीयत

(ई) दिलीपः हरिणा स्वदेहम् उपानीयत

६) "पालयितुः" – अस्य प्रातिपदिकं किम् ?

(अ) पालयत्

(आ) पालयितृ

(इ) पालयिता

(ई) पालयितु

७) "उत्पश्यतः" – अत्र कः प्रत्ययः ?

(अ) शतृ

(आ) शानच्

(इ) तृच्

(ई) क्त

८) "अवाङ्मुखस्य" – अत्र विग्रहः कः ?

(अ) अवाक् मुखम्, तस्य

(आ) मुखस्य अधः, तस्य

(इ) अवाक् मुखं यस्य, तस्य

(ई) अवाचः मुखम्, तस्य

९) "पुष्पवृष्टिः" – अत्र कः प्रत्ययः ?

(अ) तिप्

(आ) क्तिन्

(इ) ष्टिञ्

(ई) वृष्टि

१०) एतेषु के देवयोनिषु न अन्तर्भवन्ति ?

(अ) अप्सरसः

(आ) विद्याधराः

(इ) पिशाचाः

(ई) दानवाः